# <u>*વાસ્તુ સૂક્તમ*</u>

વાસ્તોષ્પતે પ્રતિ જાનીહ્યસ્માન્ત્સ્વાવેશો અનમીવો ભવા નઃ ।
યત્ત્વેમહે પ્રતિ તન્નો શં નો ભવ દ્વિપદે શં ચતુષ્પદે ॥ 1 ॥

વાસ્તોષ્પતે પ્રતરણો ન એધિ ગયસ્ફાનો ગોભિરશ્વેભિરિન્દો ।
અજરાસસ્તે સખ્યે સ્યામ પિતેવ પુત્રાન્પ્રતિ નો જુષસ્વ ॥ 2 ॥

વાસ્તોષ્પતે શગ્મયા સંસદા તે સક્ષીમહિ રણ્વયા ગાતુમત્યા ।
પાહિ ક્ષેમ ઉત યોગે વરં નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ 3 ॥

અમીવહા વાસ્તોષ્પતે વિશ્વા રૂપાણ્યાવિશન ।
સખા સુશેવ એધિ નઃ ॥ 4 ॥

॥ ઈતિ વાસ્તુ સૂક્તં સંપૂર્ણમ ॥